दिनाङ्कः-31.12.2025

प्रातः - 06:55

## प्रधानमन्त्री- रिफॉर्म एक्सप्रेस

प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् भारतं रिफॉर्म एक्सप्रेस इति दोषनिवृत्ति पथे अग्रेसरं वर्तते। येन भारतं जगतः केन्द्रत्वं वर्तते। प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः ऐषमः 'रिफॉर्म एक्सप्रेस इति विषये सोशल मीडिया इति सामाजिकसञ्चार-पटले एको लेखः लिखितः। अस्मिन् लेखे शासनस्य तेषां सञ्चयी कार्याणां विवरणं प्रस्तुतं यैः शनैः शनैः बाधाः निराकृताः। श्री मोदी अवदत् यत् पञ्चविंशत्युत्तर-द्विसहस्रतमे वर्षे भारतेन श्रमविधै व्यापार-सन्धौ ऊर्जायाम् अन्येषु क्षेत्रेषु च देशस्य विकासगाथा विश्वसनीयता स्थिरता दीर्घकालिक-विश्वासः च दृष्टिङ्गताः। प्रधानमन्त्री अवदत् यत् एते पदक्षेपाः सप्तचत्वारिंशदुत्तर-द्विसहस्रतम-वर्षं यावत् विकसितभारतनिर्माणे सहायकाः भविष्यति।

## प्रधानमन्त्री आर्थशास्त्रिणः

प्रधानमन्त्री नरेन्द्रमोदी ह्यः नीति-आयोगे आगामी वर्षस्य आय-व्यय संकल्पना-पत्रम् आलक्ष्य देशस्य अर्थक्षेत्रस्य विशेषज्ञैः सह उपवेशनम् अकरोत्। इदम् उपवेशनम् अर्थिकक्षेत्रविशेषज्ञाणां विचारानुभवानाम् आधारेण वर्तमानार्थिक-स्थितिम् अवलोक्य भावि संभावनायै अवर्तत। अस्मिन् उपवेशने विकासं समेधितुं दोषनिवृत्तये च विचारविमर्शो विहितः। नीति आयोगे विहिता परिचर्चा प्रशासनाय भावियोजना निर्माणे साहाय्यं प्रदास्यति।

## मुख्यमन्त्री रेखा गुप्ता

दिल्ली-सर्वकारेण दिल्ली-जन-विश्वास (प्रावधानानां संशोधनम्) विधेयकम्, विंशति षड्विंशति इति स्वीकृतम्। दिल्ल्याः मुख्यमन्त्री रेखा गुप्ता अवदत् यत् दिल्ली-मन्त्रिमण्डलेन अनुमोदितं विधेयकं, अनुपालन-प्रक्रियां सरलीकर्तुं, लघु-उल्लंघनान् अपराध-श्रेन्याः मुक्तं कर्तुं, न्यायालयेषु

प्रकरणानां सङ्ख्या न्यूनीकर्तुं, प्रशासनिक-कार्यक्षमतां वर्धयितुं च उद्दिष्टम् अस्ति। सा अवोचत् यत् अग्रिमे मासे पञ्चम् दिनाङ्कात् आरभ्यमाणे दिल्लीविधानसभायाः आगामि शीतकालसत्रावधौ एतत् विधेयकं स्वीकृतं भविष्यति।

## नायडू-ध्रुव उदग्रविमान

केन्द्रीय-नागरिक-उड्डयन-मन्त्री किञ्जरापु-राममोहन-नायडुः ह्यः बेङ्गलूरुनगरे ध्रुव्-एन्. जी. उदग्रविमानस्य प्रथमं उद्घाटन-उड्डयनं हरितध्वजं प्रदर्शितवान्। एड्वान्स्ड्-लाइट-हेलिकाप्टर-नेक्स्ट्-जनरेशन्-ध्रुव उदग्रविमानस्य स्वदेशी-उदग्रविमानस्य नागरिक-संस्करणम् अस्ति यत् पञ्चविंशत्यधिक द्विसहस्रतमे वर्षे एरो-इण्डिया-प्रदर्शने एच्. ए. एल. इत्यनेन प्रदर्शितम् आसीत्।

## भारतीयसेनया

भारतीयसेनया पञ्चविंशत्यधिक द्विसहस्रतमे वर्षे महत्त्वपूर्ण-प्रगत्याः, प्रचालनात्मक- प्रतिरोधस्य च प्रमुख-लक्ष्याणि अधोरेखितम्। पहलगाम आतङ्क्याक्रमणस्य अनन्तरं, अस्मिन् वर्षे मई-मासे आपरेशन् सिन्दूर् इत्याभियानस्य आरम्भः अभवत्, यस्मिन् नव आतङ्कि-शिबिराणि नष्टानि अभवन्, सप्त च सीमपारे निष्प्रभावीकृतानि । एतानि आक्रमणानि सुनिर्दिष्टानि, क्रमबद्धानि, कालबद्धानि च आसन्।

## बांग्लादेशः

विदेशमन्त्री एस् जयशङ्करः अद्य ढाका-नगरे बाङ्ग्लादेशस्य पूर्वप्रधानमन्त्री तथा बि. एन्. पी. इति दलस्य अध्यक्षायाः खालिदा जिया इत्यस्याः अन्त्येष्टिक्रियायां सम्मिलितः भविष्यति। डा. जयशङ्करः अन्त्येष्टिक्रियायां भारत-सर्वकारस्य जनानां च प्रतिनिधित्वं करिष्यति। बाङ्ग्लादेशस्य प्रथमा महिला प्रधानमन्त्री खालिदा जिया ह्यः ढाकानगरे पञ्चत्वे निलीना। प्रधानमंत्री नरेन्द्रमोदी तस्या: निधने शोकं प्रकटितवान्। खालिदा जिया अशीति- वर्षीया आसीत्। एकस्मिन् सामाजिकसंचार-पटले बीएनपी इति दलेन लिखितं यत् प्रशासनेतर-चिकित्सालये सा उपचर्यमाणा आसीत्।

क्रिकेट्

महिलानां क्रिकेट्-क्रीडायां भारत-श्रीलङ्कादलयोः विंशतिं प्रतिविंशतिः स्पर्धामालिकायाः पञ्चमान्तिम-स्पर्धायां केरलस्य तिरुवनन्त-पुरमस्थिते ग्रीनफील्ड क्रीडाङ्गणे भारतेन श्रीलंका दलं पंचदश धावनांकै: पराजितम्।